तृतीयः पाठः

# गोदोहनम्

0961CH03

एष नाट्यांशः 'चतुर्व्यूहम्' इति पुस्तकात् संक्षिप्य सम्पाद्य च उद्धृतः। अस्मिन् नाटके एतादृशस्य जनस्य कथानकम् अस्ति यः धनवान् सुखाकांक्षी च भवितुम् इच्छुकः मासपर्यन्तं दुग्धदोहनादेव विरमति, येन मासान्ते धेनोः शरीरे सञ्चितं पर्याप्तं दुग्धम् एकवारमेव विक्रीय सम्पत्तिमर्जयितुं समर्थः भवेत्। परं मासान्ते यदा सः दुग्धदोहनाय प्रयतते तदा सः दुग्धबिन्दुम् अपि न प्राप्नोति। दुग्ध-प्राप्तिस्थाने सः धेनोः प्रहारैः रक्तरञ्जितः भवति, अवगच्छति च यत् दैनन्दिनं कार्यं यदि मासपर्यन्तं-संगृह्य क्रियते तदा लाभस्य स्थाने हानिरेव भवति।

*(प्रथमं दृश्यम्)*

*(मल्लिका मोदकानि साधयन्ती मन्दस्वरेण शिवस्तुतिं करोति)*

*(ततः प्रविशति मोदकगन्धम् अनुभवन् प्रसन्नमना चन्दनः।)*

**चन्दनः** – अहा! सुगन्धस्तु मनोहरः (विलोक्य) अये मोदकानि रच्यन्ते? (प्रसन्नः भूत्वा) आस्वादयामि तावत्। (मोदकं ग्रहीतुमिच्छति)

**मल्लिका** – (सक्रोधम्) विरम। विरम। मा स्पृश एतानि मोदकानि।

**चन्दनः** – किमर्थं क्रुध्यसि! तव हस्तनिर्मितानि मोदकानि दृष्ट्वा अहं जिह्वालोलुपतां नियन्त्रयितुम् अक्षमः अस्मि, किं न जानासि त्वमिदम्?

**मल्लिका** – सम्यग् जानामि नाथ! परम् एतानि मोदकानि पूजानिमित्तानि सन्ति।

**चन्दनः** – तर्हि, शीघ्रमेव पूजनं सम्पादय। प्रसादं च देहि।

**मल्लिका** – भोः! अत्र पूजनं न भविष्यति। अहं स्वसखीभिः सह श्वः प्रातः काशीविश्वनाथमन्दिरं गमिष्यामि, तत्र गङ्गास्नानं धर्मयात्राञ्च वयं करिष्यामः।

**चन्दनः** – सखिभिः सह! न मया सह! (विषादं नाटयति)

**मल्लिका** – आम्। चम्पा, गौरी, माया, मोहिनी, कपिलादयः सर्वाः गच्छन्ति। अतः, मया सह तवागमनस्य औचित्यं नास्ति। वयं सप्ताहान्ते प्रत्यागमिष्यामः। तावत्, गृह-व्यवस्थां, धेनोः दुग्धदोहनव्यवस्थाञ्च परिपालय।

© NCERT not to be republished

*(द्वितीयं दृश्यम्)*

**चन्दनः** – अस्तु। गच्छ। सखीभिः सह धर्मयात्रया आनन्दिता च भव। अहं सर्वमपि परिपालयिष्यामि। शिवास्ते सन्तु पन्थानः!

**चन्दनः** – मल्लिका तु धर्मयात्रायै गता। अस्तु। दुग्धदोहनं कृत्वा ततः स्वप्रातराशस्य प्रबन्धं करिष्यामि। (स्त्रीवेषं धृत्वा, दुग्धपात्रहस्तः नन्दिन्याः समीपं गच्छति)

**उमा** – मातुलानि! मातुलानि!

**चन्दनः** – उमे! अहं तु मातुलः। तव मातुलानी तु गङ्गास्नानार्थं काशीं गता अस्ति। कथय! किं ते प्रियं करवाणि?

**उमा** – मातुल! पितामहः कथयति, मासानन्तरम् अस्मद् गृहे महोत्सवः भविष्यति। तत्र त्रिशत-सेटकमितं दुग्धम् अपेक्ष्यते। एषा व्यवस्था भवद्भिः करणीया।

**चन्दनः** – (प्रसन्नमनसा) त्रिशत-सेटककपरिमितं दुग्धम्! शोभनम्। दुग्धव्यवस्था भविष्यति एव इति पितामहं प्रति त्वया वक्तव्यम्।

**उमा** – धन्यवादः मातुल! याम्यधुना। *(सा निर्गता)*

*(तृतीयं दृश्यम्)*

**चन्दनः** – (*प्रसन्नो भूत्वा, अङ्गुलिषु गणयन्*) अहो! त्रिशत-सेटकं दुग्धम्! अनेन तु बहुधनं लप्स्ये। (नन्दिनीं दृष्ट्वा) भो नन्दिनि! तव कृपया तु अहं धनिकः भविष्यामि। (*प्रसन्नः सः धेनोः बहुसेवां करोति*)

**चन्दनः** – (चिन्तयति) मासान्ते एव दुग्धस्य आवश्यकता भवति। यदि प्रतिदिनं दोहनं करोमि तर्हि दुग्धं सुरक्षितं न तिष्ठति। इदानीं किं करवाणि? भवतु नाम मासान्ते एव सम्पूर्णतया दुग्धदोहनं करोमि।

*(एवं क्रमेण सप्तदिनानि व्यतीतानि। सप्ताहान्ते मल्लिका प्रत्यागच्छति)*

**मल्लिका** – (*प्रविश्य*) स्वामिन्! प्रत्यागता अहम्। आस्वादय प्रसादम्।

*(चन्दनः मोदकानि खादति वदति च)*

**चन्दनः** – मल्लिके! तव यात्रा तु सम्यक् सफला जाता? काशीविश्वनाथस्य कृपया प्रियं निवेदयामि।

**मल्लिका** – (*साश्चर्यम्*) एवम्। धर्मयात्रातिरिक्तं प्रियतरं किम्?

**चन्दनः** – ग्रामप्रमुखस्य गृहे मासान्ते महोत्सवः भविष्यति। तत्र त्रिशत-सेटकमितं दुग्धम् अस्माभिः दातव्यम् अस्ति।

**मल्लिका** – किन्तु एतावन्मात्रं दुग्धं कुतः प्राप्स्यामः?

**चन्दनः** – विचारय मल्लिके! प्रतिदिनं दोहनं कृत्वा दुग्धं स्थापयामः चेत् तत् सुरक्षितं न तिष्ठति। अत एव दुग्धदोहनं न क्रियते। उत्सवदिने एव समग्रं दुग्धं धोक्ष्यावः।

**मल्लिका** – स्वामिन्! त्वं तु चतुरतमः। अत्युत्तमः विचारः। अधुना दुग्धदोहनं विहाय केवलं नन्दिन्याः सेवाम् एव करिष्यावः। अनेन अधिकाधिकं दुग्धं मासान्ते प्राप्स्यावः।

*(द्वावेव धेनोः सेवायां निरतौ भवतः। अस्मिन् क्रमे घासादिकं गुडादिकं च भोजयतः। कदाचित् विषाणयोः तैलं लेपयतः तिलकं धारयतः, रात्रौ नीराजनेनापि तोषयतः)*



**चन्दनः** – मल्लिके! आगच्छ। कुम्भकारं प्रति चलावः। दुग्धार्थं पात्रप्रबन्धोऽपि करणीयः। *(द्वावेव निर्गतौ)*

*(चतुर्थं दृश्यम्)*

**कुम्भकारः** – *(घटरचनायां लीनः गायति)*

**ज्ञात्वाऽपि जीविकाहेतोः रचयामि घटानहम्।**
**जीवनं भङ्गुरं सर्वं यथायं मृत्तिकाघटः॥**

**चन्दनः** – नमस्करोमि तात! पञ्चदश घटान् इच्छामि। किं दास्यसि?

**देवेश** – कथं न? विक्रयणाय एव एते। गृहाण घटान्। पञ्चाशदुत्तरैकशतं रूप्यकाणि च देहि।

**चन्दनः** – साधु। परं मूल्यं तु दुग्धं विक्रीय एव दातुं शक्यते।

**देवेशः** – क्षम्यतां पुत्र! मूल्यं विना तु एकमपि घटं न दास्यामि।

© NCERT not to be republished

**मल्लिका** – *(स्वाभूषणं दातुमिच्छति)* तात! यदि अधुनैव मूल्यम् आवश्यकं तर्हि, गृहाण एतत् आभूषणम्।

**देवेशः** – पुत्रिके! नाहं पापकर्म करोमि। कथमपि नेच्छामि त्वाम् आभूषणविहीनां कर्तुम्। नयतु यथाभिलषितं घटान्। दुग्धं विक्रीय एव घटमूल्यम् ददातु।

**उभौ** – धन्योऽसि तात! धन्योऽसि।

*(पञ्चमं दृश्यम्)*

*(मासानन्तरं सन्ध्याकालः। एकत्र रिक्ताः नूतनघटाः सन्ति। दुग्धक्रेतारः अन्ये च ग्रामवासिनः अपरत्र आसीनाः)*

**चन्दनः** – *(धेनुं प्रणम्य, मङ्गलाचरणं विधाय, मल्लिकाम् आह्वयति)* मल्लिके! सत्वरम् आगच्छ।

**मल्लिका** – आयामि नाथ! दोहनम् आरभस्व तावत्।

**चन्दनः** – (यदा धेनोः समीपं गत्वा दोग्धुम् इच्छति, तदा धेनुः पृष्ठपादेन प्रहरति। चन्दनश्च पात्रेण सह पतति) नन्दिनि! दुग्धं देहि। किं जातं ते? (पुनः प्रयासं



करोति) (नन्दिनी च पुनः पुनः पादप्रहारेण ताडयित्वा चन्दनं रक्तरञ्जितं करोति) हा! हतोऽस्मि। (चीत्कारं कुर्वन् पतति) (सर्वे आश्चर्येण चन्दनम् अन्योन्यं च पश्यन्ति)

**मल्लिका** – (चीत्कारं श्रुत्वा, झटिति प्रविश्य) नाथ! किं जातम्? कथं त्वं रक्तरञ्जितः?

**चन्दनः** – धेनुः दोग्धुम् अनुमतिम् एव न ददाति। दोहनप्रक्रियाम् आरभमाणम् एव ताडयति माम्।

*(मल्लिका धेनुं स्नेहेन वात्सल्येन च आकार्य दोग्धुं प्रयतते। किन्तु, धेनुः दुग्धहीना एव इति अवगच्छति।)*

**मल्लिका** – (चन्दनं प्रति) नाथ! अत्यनुचितं कृतम् आवाभ्याम् यत्, मासपर्यन्तं धेनोः दोहनं न कृतम्। सा पीडा अनुभवति। अत एव ताडयति।

**चन्दनः** – देवि! मयापि ज्ञातं यत्, अस्माभिः सर्वथा अनुचितमेव कृतं यत्, पूर्णमासपर्यन्तं दोहनं न कृतम्। अत एव, इयं दुग्धहीना जाता। सत्यमेव उक्तम्–

**कार्यमद्यतनीयं यत् तदद्यैव विधीयताम्।**
**विपरीता गतिर्यस्य स कष्टं लभते ध्रुवम्॥**

**मल्लिका** – आम् भर्तः! सत्यमेव। मयापि पठितं यत्–

**सुविचार्य विधातव्यं कार्यं कल्याणकाङ्क्षिणा।**
**यः करोत्यविचार्यैतत् स विषीदति मानवः॥**

किन्तु प्रत्यक्षम् अद्य एव अनुभूतम् एतत्।

**सर्वे** – दिनस्य कार्यं तस्मिन्नेव दिने कर्तव्यम्। यः एवं न करोति सः कष्टं लभते ध्रुवम्।

(जवनिका पतनम्)
(सर्वे मिलित्वा गायन्ति।)

**आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः।**
**क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम्॥**

**श्लोकान्वयः–**

1. यथा एष मृत्तिकाघटः– (तथा) सर्वं जीवनं भङ्गुरं ज्ञात्वा अपि अहंजीविकाहेतोः घटान् रचयामि।
2. यत् अद्यतनीयं कार्यं स्यात् तत् अद्यैव विधीयताम्। यस्य गतिः विपरीता (अस्ति) सः ध्रुवं कष्टं लभते।



© NCERT not to be republished

3. कल्याणकाङ्क्षिणा कार्यं सुविचार्य (एव) विधातव्यम्। यः मानवः एतत् अविचार्य करोति सः विषीदति।

4. क्षिप्रम् अक्रियमाणस्य आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः तद्रसं कालः पिबति।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| **धेनुः** | गौः | गाय | Cow |
| **मन्दस्वरेण** | निम्नस्वरेण | धीमी आवाज़ में | In low volume |
| **मनोहरः** | आकर्षकः | मनमोहक | Attractive |
| **विरम** | तिष्ठ | रुको | Stop |
| **जिह्वालोलुपताम्** | रसनालोभम् | जीभ का लालच | Fascination of tongue |
| **अक्षमः** | असमर्थः | असहाय | Incapable |
| **धर्मयात्राम्** | तीर्थयात्राम् | धार्मिक यात्रा | Pilgrimage |
| **सेटकम्** | एकलीटरमितम् | एक लीटर | One liter |
| **प्रत्यागता** | प्रत्यायाता | लौट आई | Came Back |
| **साश्चर्यम्** | सविस्मयम् | हैरानी से | With astonishment |
| **दुग्धदोहनम्** | पयोदोहनम् | दूध दुहना | Milking |
| **निरतौ** | संलग्नौ | दोनो जुटे हुए | Both involved |
| **भङ्गुरम्** | भञ्जनशीलं | टूटकर समाप्त होने वाला | Breakable |
| **विक्रीय** | विक्रयं कृत्वा | बेचकर | Selling |
| **रिक्ताः** | शून्याः | खाली | Empty |
| **रक्तरञ्जितम्** | शोणिताप्लावितम् | खून से सना | Wet with blood |
| **अन्योन्यम्** | परस्परम् | आपस में | To each other |
| **अनुमतिम्** | आज्ञा | अनुमति | Permission |
| **शुष्कम्** | नीरसम् | सूखा | Dry |
| **ध्रुवम्** | निश्चितम् | निश्चित रूप से | Certainly |
| **कल्याणकाङ्क्षिणा** | कल्याणेच्छुकेन | कल्याण चाहने वाले के द्वारा | By well wisher |
| **विषीदति** | दुःखम् आप्नोति | दुखी होता है | Gets agony |
| **जवनिका** | यवनिका | पर्दा | Curtain |
| **क्षिप्रम्** | द्रुतम् | शीघ्रता से | Quickly |

© NCERT not to be republished

## अभ्यासः

**1. एकपदेन उत्तरं लिखत–**

(क) मल्लिका पूजार्थं सखीभिः सह कुत्र गच्छति स्म?

(ख) उमायाः पितामहेन कतिसेटकमितं दुग्धम् अपेक्ष्यते स्म?

(ग) कुम्भकारः घटान् किमर्थं रचयति?

(घ) कानि चन्दनस्य जिह्वालोलुपतां वर्धयन्ति स्म?

(ङ) नन्दिन्याः पादप्रहारैः कः रक्तरञ्जितः अभवत्?

**2. पूर्णवाक्येन उत्तरं लिखत–**

(क) मल्लिका चन्दनश्च मासपर्यन्तं धेनोः सेवां कथम् अकुरुताम्?

(ख) कालः कस्य रसं पिबति?

(ग) घटमूल्यार्थं यदा मल्लिका स्वाभूषणं दातुं प्रयतते तदा कुम्भकारः किं वदति?

(घ) मल्लिकया किं दृष्ट्वा धेनोः ताडनस्य वास्तविकं कारणं ज्ञातम्?

(ङ) मासपर्यन्तं धेनोः अदोहनस्य किं कारणमासीत्?

**3. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत –**

(क) मल्लिका <u>सखीभिः</u> सह धर्मयात्रायै गच्छति स्म।

(ख) चन्दनः दुग्धदोहनं कृत्वा एव <u>स्वप्रातराशस्य</u> प्रबन्धम् अकरोत्।

(ग) <u>मोदकानि</u> पूजानिमित्तानि रचितानि आसन्?

(घ) मल्लिका स्वपतिं <u>चतुरतमं</u> मन्यते?

(ङ) <u>नन्दिनी</u> पादाभ्यां ताडयित्वा चन्दनं रक्तरञ्जितं करोति?

**4. मञ्जूषायाः सहायतया भावार्थे रिक्तस्थानानि पूरयत–**

| **गृहव्यवस्थायै, उत्पादयेत्, समर्थकः, धर्मयात्रायाः, मङ्गलकामनाम्, कल्याणकारिणः॥** |
|---|

यदा चन्दनः स्वपत्न्याः काशीविश्वनाथं प्रति .............. विषये जानाति तदा सः क्रोधितः न भवति यत् तस्याः पत्नी तं ..............कथयित्वा सखीभिः सह भ्रमणाय गच्छति अपि तु तस्याः यात्रायाः कृते .............. कुर्वन् कथयति यत् तव मार्गाः शिवाः अर्थात् .............. भवन्तु। मार्गे काचिदपि बाधा तव कृते समस्यां न ..............। एतेन सिध्यति यत् चन्दनः नारीस्वतन्त्रतायाः .............. आसीत्।



© NCERT not to be republished

**5. घटनाक्रमानुसारं लिखत -**

(क) सा सखीभिः सह तीर्थयात्रायै काशीविश्वनाथमन्दिरं गच्छति।

(ख) उभौ नन्दिन्याः सर्वविधपरिचर्यां कुरुतः।

(ग) उमा मासान्ते उत्सवार्थं दुग्धस्य आवश्यकताविषये चन्दनं सूचयति।

(घ) मल्लिका पूजार्थं मोदकानि रचयति।

(ङ) उत्सवदिने यदा दोग्धुं प्रयत्नं करोति तदा नन्दिनी पादेन प्रहरति।

(च) कार्याणि समये करणीयानि इति चन्दनः नन्दिन्याः पादप्रहारेण अवगच्छति।

(छ) चन्दनः उत्सवसमये अधिकं दुग्धं प्राप्तुं मासपर्यन्तं दोहनं न करोति।

(ज) चन्दनस्य पत्नी तीर्थयात्रां समाप्य गृहं प्रत्यागच्छति।

**6. अधोलिखितानि वाक्यानि कः कं प्रति कथयति इति प्रदत्तस्थाने लिखत-**

| **उदाहरणम्-** | **कः/का** | **कं/काम्** |
|---|---|---|
| स्वामिन्! प्रत्यागता अहम्। आस्वादय प्रसादम्। | मल्लिका | चन्दनं प्रति |
| (क) धन्यवाद मातुल! याम्यधुना। | .................... | .................... |
| (ख) त्रिसेटकमितं दुग्धम्। शोभनम्। व्यवस्था भविष्यति। | .................... | .................... |
| (ग) मूल्यं तु दुग्धं विक्रीयैव दातुं शक्यते। | .................... | .................... |
| (घ) पुत्रिके! नाहं पापकर्म करोमि। | .................... | .................... |
| (ङ) देवि! मयापि ज्ञातं यदस्माभिः सर्वथानुचितं कृतम्। | .................... | .................... |

**7. पाठस्य आधारेण प्रदत्तपदानां सन्धिं/सन्धिच्छेदं वा कुरुत -**

(क) शिवास्ते = .................... + ....................

(ख) मनः हरः = .................... + ....................

(ग) सप्ताहान्ते = .................... + ....................

(घ) नेच्छामि = .................... + ....................

(ङ) अत्युत्तमः = .................... + ....................

**(अ) पाठाधारेण अधोलिखितपदानां प्रकृतिं प्रत्ययं च संयोज्य/विभज्य वा लिखत-**

(क) करणीयम् = .................... + ....................

(ख) वि+क्री+ल्यप् = ........................................

(ग) पठितम् = .................... + ....................

(घ) तड्य+क्त्वा = ........................................

(ङ) दोग्धुम् = .................... + ....................

© NCERT not to be republished

## योग्यताविस्तारः

'गोदोहनम्' एकांकी में एक ऐसे व्यक्ति का कथानक है जो धनवान् और सुखी बनने की इच्छा से अपनी गाय से एक महीने तक दूध निकालना बन्द कर देता है, ताकि महीने भर के दूध को एक साथ निकालकर बेचकर धनवान् बन सके। इस प्रकार एक मास पश्चात् जब वह गाय को दुहने का प्रयास करता है तब अत्यधिक दूध का तो कहना ही क्या, उसे दूध की एक बूँद भी नहीं मिलती, अपि तु दूध के स्थान पर उसे मिलते हैं गाय के पैरों के प्रहार, जिससे आहत और रक्तरञ्जित होकर वह ज़मीन पर गिर पड़ता है। इस घटना से वहाँ उपस्थित सभी यह समझ जाते हैं कि यथासमय किया हुआ कार्य ही फलदायी होता है।

## भाव-विस्तारः

**उपायं चिन्तयेत् प्राज्ञस्तथापायं च चिन्तयेत्।**
**पश्यतो बकमूर्खस्य नकुलेन हताः बकाः॥**

बुद्धिमान व्यक्ति उपाय पर विचार करते हुए अपाय अर्थात् उपाय से होने वाली हानि के विषय में भी सोचे क्योंकि हानिरहित उपाय ही कार्य सिद्ध करता है, अपाय युक्त उपाय नहीं जैसे कि अपने बच्चों को साँप द्वारा खाए जाते हुए देखकर एक बगुले ने नेवले का प्रबन्ध साँप को खाने के लिए किया जो कि साँप को खाने के साथ-साथ सभी बगुलों को भी बच्चों सहित खा गया। अतः ऐसा उपाय सदैव हानिकारक होता है, जिसके अपाय पर विचार न किया जाए।

**"अविवेकः परमापदां पदम्"**

गोदोहनम् - एकाङ्की पढ़ाते समय संदर्भ को आधुनिक परिवेश से जोड़ें तथा छात्रों को समझाएँ कि कोई भी कार्य यदि नियत समय पर न करके कई दिनों के पश्चात् एक साथ करने के लिए संगृहीत किया जाता रहता है तो उससे होने वाला लाभ-हानि में परिवर्तित हो सकता है।
अतः हमें सदैव अपने सभी कार्य यथासमय करने के लिए प्रयत्नशील रहना चाहिए। पाठ की कथा नाटकीयता के साथ ही छात्रों को यह भी बताएँ कि इस नाटक से तात्कालिक समाज का परिचय भी मिलता है कि घर की व्यवस्था स्त्री-पुरुष मिलकर ही करते थे तथा स्त्री को स्वतन्त्र निर्णय लेने का भी पूर्ण अधिकार प्राप्त था।

© NCERT not to be republished